# संस्कृतवार्ताः

**दिनाङ्कः- 24.06.2026**

**प्रातः - 06:55**

**प्रधानमन्त्री ब्रिक्स्**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी उक्तवान् यत्, परिवर्तनशीलवैश्विक-परिस्थितौ सुरक्षासहकार्यं गभीरं कर्तुं तथा च आतङ्कवादात्, अन्तर्जालीय-सुरक्षायाः च आरभ्य, उदयमानप्रौद्योगिकीपर्यन्तं, समाह्वानानां परिहारे, ब्रिक्स् इत्यस्य महत्त्वपूर्णा भूमिका अस्ति। प्रधानमन्त्री श्रीमोदी, गतसायं, नवदिल्ल्यां, ब्रिक्सदेशानां राष्ट्रिय-सुरक्षा-परामर्षदैः, वरिष्ठसुरक्षाधिकारिभिः च सह मिलितवान्। सामाजिक-माध्यम-सन्देशे श्रीमोदिना प्रकाशितं यत् भारतस्य ब्रिक्स-अध्यक्षता व्यावहारिक-सहकार्यं प्रवर्तयितुं, वैश्विक-दक्षिणस्य प्राथमिकतानां समर्थनं कर्तुं, सुरक्षित-समावेशीय-विश्वे च योगदानं दातुं प्रयतते।

**प्रधानमन्त्री-कतर-अमीरः**

प्रधानमन्त्री श्रीनरेन्द्रमोदी, कतर-देशस्य अमीरस्य, शेख तमीम बिन् हमद अल-थानी इत्यस्य दूरभाषं प्राप्तवान्। कतरस्य रास लफ्फान् औद्योगिकनगरे दुर्घटनायां भारतीयनागरिकाणां निधन-विषये कतरस्य अमीरः शोकं प्रकटितवान् तथा च घातितानां शीघ्रं स्वस्थतायाः आशां प्रकटितवान्। श्रीमोदी प्रभावितपरिवारेभ्यः सहानुभूतिवचनानां कृते कतर-अमीराय धन्यवादं दत्तवान्, व्रणितानां कृते शीघ्रं चिकित्सा-सहायता-प्रदानाय च प्रशंसितवान्। द्वौ नेतारौ स्वनागरिकाणां कल्याणं सुरक्षां च सुनिश्चेतुं स्वप्रतिबद्धतायाः पुनः पुष्टिं कृतवन्तौ।

**खनिजविभागः**

भारतस्य खनिज-मन्त्रालयेन षट्-पञ्चाशत् महत्त्वपूर्णानां सामरिक-खनिज-खण्डानाम् अथ एकादश अन्वेषण-अनुज्ञा-पत्रखण्डानां च सफल-सघोष-विक्रयणेन सह, क्रिटिकल् मिनरल मिशन इति दुर्लभ-खनिज-कार्यक्रमस्य महती गतिः प्राप्ता अस्ति। मन्त्रालयेन सघोषविक्रयणस्य, सप्तमस्य खण्डस्य, अन्तर्गतं दश महत्त्वपूर्ण-सामरिक-खनिजखण्डाः सफलतया सघोष-विक्रयणं कृताः।

**विदेश-मन्त्रालयः**

भारतेन पाकिस्तानाक्रमित-जम्मू-कश्मीरस्य स्थितिविषये कृत-टिप्पणी-सम्बद्धम्, पाकिस्तानस्य रक्षामन्त्री ख्वाजा आसिफ् इत्यस्य घोर आलोचना कृता। विदेश-मन्त्रालयेन कथितं यत् एताः टिप्पण्यः, प्रतिवेशी-देशस्य स्वस्य असफलताम् अवच्छादनाय, स्वस्य मानव-अधिकारस्य उल्लङ्घनात् ध्यानं दूरीकर्तुं क्रियमाणाः, निराशाजनकाः प्रयासाः सन्ति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् भारतम्, एतान् कल्पित-आरोपान् स्पष्टतया तिरस्कुर्वति। सः आशां प्रकटितवान् यत् अन्ताराष्ट्रिय-समुदायः पाकिस्तानस्य दुष्कृतानां दुरुपयोगानाञ्च उत्तरदायी भविष्यति।

विदेशमन्त्रालयेन कतरदेशे विस्फोटेन द्वादश-भारतीयनागरिकाणां मृत्योः पुष्टिः कृता अस्ति। जयसवालः अवदत् यत्, अस्यां घटनायां आहत्य षट्षष्टिः जनाः घातिताः सन्ति, ये सम्प्रति चिकित्सां प्राप्नुवन्ति। कतरदेशे अग्निदुःखद-घटनायां, प्रभावितानां जनानां सहायार्थं तमिलनाडुसर्वकारेण सहायता घोषिता। मुख्यमन्त्री सी. जोसेफ् विजयः अस्याम् घटनायां ये प्राणान् त्यक्तवन्तः तेषां परिवारेभ्यः दशलक्षरूप्यकाणां अनुग्रहराशिं घोषितवान्।

**पद्म पुरस्कारः**

राष्ट्रपति द्रौपदी मुर्मुः गत सायं राष्ट्रपति-भवने नागरिक-सम्मान-समारोहे पद्म पुरस्कार-प्रदानं कृतवती। पत्रकारः पी. नारायणन, टेनिस-क्रीडकः विजय अमृतराज, अभिनेतारौ मममूट्टी तथा आर. माधवन, गायिका अलका याग्निकः च प्राप्तपुरस्कारेषु अन्यतमाः सन्ति। अस्मिन् वर्षे सर्वकारेण आहत्य एकत्रिंशदुत्तरएकशतम् पद्मपुरस्काराः घोषिताः आसन्। एतेषु पञ्च पद्मविभूषणं, त्रयोदश-पद्मभूषणं, त्रयोदशाधिक-एकशतम् पद्मश्रीपुरस्काराः च सन्ति।

**शिवराज- मानसून –सिद्धता**

कृषि-कृषक-कल्याण मंत्री, शिवराज-सिंह-चौहानः अवदत् यत्, एल नीनो-कारणात् उत्पद्यमानस्य दुर्बल-मानसूनस्य सम्भाव्य-प्रभावस्य निवारणे, भारत-सर्वकारः कृषकाणां सहायतायै पूर्व-सिद्धतां कुर्वन् अस्ति। ह्यः नवदिल्ल्यां पत्रकारसम्मेलनं सम्बोधयन् श्रीचौहानः अवदत् यत् राज्येभ्यः धान्यानि, स्थूलधान्यानि, तैलबीजानि इत्यादीनां सस्यानां प्रचारार्थं परामर्शः दत्तः, येषां जलस्य आवश्यकता न्यूना भवति, कठिनपरिस्थितौ च उत्तमं फलं दातुं च शक्नुवन्ति।